हत्वा ऋषिमश्रेष्ठो याच्यतां सुरसत्तमाः” । दधीचास्थीनि देहीति तैर्बधिष्यामहे रिपून् । स च तैर्याचितोऽस्थीनि यत्नादृषिवरस्तदा । प्राणत्यागं कुरुश्रेष्ठ ! चकारैवाविचारयन् । सलोकानक्षयान् प्राप्तो देवप्रियकरस्तदा । तस्यास्थिभिरथो शक्रः संप्रहृष्टमनास्तदा । कारयामास दिव्यानि नानाप्रहरणानि च । वज्राणि चक्राणि गदा गुरून् दण्डांश्च पुष्कलान्” भा० शल्य० ५२ अ० । “गते शतक्रतौ चत्तः ! कर्हमस्ते न चोदितः । यथोचितं सुदुहितुः प्रादात् विश्वसृजां ततः” इत्युपक्रमे “अथर्वणोऽददाच्छान्तिं यया यज्ञो वितन्यते”भाग० ३।२४।२४ अ० । “दध्यङ्ङाथर्वणस्त्वष्ट्रे वर्म्माभेद्यं मदात्मकम्” भाग० ६।८।५१ । तस्याथर्वणकर्हमदुहितृशान्तिजातत्वादाथर्वणत्वविशेषणम् । “ददौ चास्थीनि देवेभ्यो दधीचिः सुमनास्तदा” अग्निपु० दध्यनुच्शब्दे व्युत्पत्तिर्दृश्या ।

**दधीचास्थि** न० ६त० । तज्जातत्वात् १वज्रे २तन्नामनामके हीरके च त्रिका० ।

**दधृष्** त्रि० धृष—क्विन् नि० । १धृष्टे क्विन्नन्तत्वात् झलि पदान्ते च कुत्वम् ।२धर्षके च ।“वाजेषु दधृषं कवे”ऋ०३।४२।६। “दधृषम् शत्रूणामभिभावकम्” भा० ।

**दधृष्वणि** त्रि० दधृषिवाचरति दधृष्+क्विप् ततो बा० वनि । धर्षके । “सासहिमधृष्ट चिद् दधृष्वणिम्” ऋ०८।६१।२ । [लाय परमेष्ठिने”यमतर्पणमन्त्रः ।

**दध्न** पु० दध—बा० न । यमभेदे । “औदुम्बराय दध्नाय नी-

**दध्यनुच्** पु० दधिं धारकमञ्चति अनुच—क्विप् । अथर्वर्षिपुत्रे दधीचौ मुनिभेदे “दध्यङ्ङाथर्वणस्त्वष्ट्रे”भाग०६।६।८।५१ “स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम्” भाग०६।८।५५। “यामथर्वा मनुष्पिता दध्यङ्धियमत्नत” इत्यृचमधिकृत्य निरुक्ते ८ १२।३२ अन्या निरुक्तिरुक्ता “दध्यङ्प्रत्यक्तो ध्यानमिति वा प्रत्यक्तमस्मिन् ध्यानमिति वा” ।“दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र यदीमुवाच” ऋ० १।११६।१२ । आथर्वणः अथर्वणः पुत्रो दध्यङ् एतत्संज्ञ ऋषिरश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रतिहितेन शिरसा वाँ युवाभ्यामीमिमां मधुविद्यां यद् यदा खलु प्रोवाच प्रोक्तवान् । तदानीमश्वस्य शिरसः सन्धानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसन्धानलक्षणं च यद्भवदीयं कर्म तदाविष्कृणोमीत्यर्थः । अत्रेयमाख्यायिका “इन्द्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदीमामनस्मै वक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनावश्वस्य शिरश्छित्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्यधत्तां तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिन्द्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति । शाट्यायनवाजसनेययोः प्रपञ्चेनोक्तम् । तस्य टादावजादौ दधीचः दधीचा इत्यादि । ततः स्वार्थे अण् इञ् वा पृषो० इत्त्वभावे । दधीच दधीचि इति रूपमित्यवधेयम् ।

**दध्यन्न** न० दध्युपसिक्तमन्नम्“अन्नेन व्यञ्जनम्”पा० समासः । दध्युपसिक्ते अन्ने “दध्यन्नं पायसं चैव गुडपिष्टं समोदकम्”याज्ञ० दध्योदनोऽप्यत्र पु० । दध्योदनं हविस्सर्पिम्” याज्ञ०ग्रहयज्ञोक्तौ ।

**दध्याकर** पु० ६त० । दधिसमुद्रे शब्दार्थकल्पतरुः ।

**दध्यानी** स्त्री दधि—दधिरसमानयति आ—नी—क गौरा० ङीष् । (सुदर्शनगुलञ्च) सुदर्शनायाम् रत्नमाला ।

**दध्युत्तर** न० ६त० । दधिस्नेहे शब्दच० । “पयसः सर्पिषश्चैव दध्नोदध्युत्तरस्य च” हरिवं० ७९३ अ० ।

**दध्युत्तरग** न० दध्न उत्तरं गच्छति गम—ड । दधिस्नेहे रत्नमाला । [ जटाधरः ।

**दध्युद(क)** पु० दधि उदकमिवास्य वा उदादेशः । दधिसमुद्रे

**दनायुस्** पु० दक्षकन्याभेदे सा च कश्यपपत्नीभेदः दनुशब्दे दृश्यम् । “दनुश्च दनायुश्च मातेव च पितेव च परिजग्रहतुस्तस्माद्दानव इत्याङ्गः” शत० ब्रा०१।६।३।८ “दनायुषः पुनः पुत्राश्चत्वारोऽसुरपुङ्गवाः । विक्षरो बलवीरौ च वृत्रश्चैव महासुरः” भा० आ० ६५अ० ।

**दनु** स्त्री दक्षकन्याभेदे सा च कश्यपर्षिपत्नी दानवमाता । “प्रजज्ञिरे महाभागा दक्षकन्यास्त्रयोदश । अदितिर्दितिर्दनुः काला दनायुः सिंहिका तथा । क्रोधा प्रधा च विश्वा च विनता कपिला मुनिः । कद्रूश्च मनुजव्याघ्र ! दक्षकन्यैव भारत । एतासां वीर्य्यसम्पन्नं पुत्रपौत्रमनन्तकम् । “चत्वारिंशद्दनोः पुत्राः ख्याताः सर्वत्र भारत । तेषां प्रथमजो राजा विप्रचित्तिर्महायशाः । शम्बरो नमुचिश्चैव पुलोमा चेति विश्रुतः । असिलोमा च केशी च दुर्ज्जयश्चैव दानवः । अयःशिरा अश्वशिरा अश्वशङ्कुश्च वीर्य्यवान् । तथा गगनमूर्द्धा च वेगवान् केतुमांश्च सः । स्वर्भानुरश्वोऽश्वपतिर्वृषपर्व्वाजकस्तथा । अश्वग्रीवश्च सूक्ष्मश्च तुहु-